# SANSKRIT

## प्रथम प्रश्न–पत्रम् : (काव्यम्, अर्थावबोध: व्याकरणं निबन्धश्च)

**Time Allowed : Three Hours** **Maximum marks : 100**

1. अद्योलिखीतेषु कयो: दयो: श्लोकयो: सप्रसंग व्याख्या कार्या– 6×2

(क) न हृष्यत्यात्मसम्माने नावमानेन तप्यते
गाङ्गो हद इवाक्षोभ्यो य: स पण्डित उच्यते।

**अथवा**

(ख) एको धर्म: परं श्रेय: क्षमैका शान्तिरूत्तमा
विद्यैका परमा तृसिरहिंसैका सुखावहा।

(ग) चक्षुषा मनसा वाचा कर्मणा च चतुर्विघम्।
प्रसादयति लोक यस्तं लोकोऽनुप्रसीदति।

**अथवा**

(घ) रोहते सायकैर्विदद्धं वनं परशुना हतम्।
वाचा दुरूक्तं बीभत्सं न संरोहति वाक्क्षतम्।

2. अद्योलिखीतेषु प्रश्नेषु केषाञ्चित् चतुर्ण्णा प्रश्नानां उत्तराणि देयानि – 4×2

(क) महाभारतस्य कस्मिन् पर्वणि विदुर नीति वर्णिता?

(ख) विदुर: क: आसीत्?

(ग) के अष्ट गुणा: पुरूषं दीपयन्ति?

(घ) नरकस्य त्रिविध द्वारं किम्?

(ड़) के षड् दोषा: हातव्या:?

(च) किं कुर्वन् जन: यश: प्राप्नोति?

(छ) धर्म: केन रक्ष्यते?

(ज) पण्डित: क: उच्यते?

3. निम्नलिखितेषु कयो: दयो: श्लोकयो: सप्रसंग व्याख्या कार्या– 6×2

(क) क्रियासु युक्तैर्नृप चारचक्षुषो
न वञ्चनीया: प्रभवोऽनुजीविभि:
अतोऽर्हसि क्षन्तुमसाधु साधु वा
हितं मनोहारि च दुर्लभं वच:।

(ख) भवन्तमेतर्हि मनस्वि गर्हिते
विवर्तमानं नरदेव वर्त्मनि
कथं न मन्युर्ज्वलयत्युदीरित:

Scanned by CamScanner

शमीतरूं शुष्कमिवाग्निरूच्छिखः।

(ग) पुराधिरूढः शयनं महाधनं
विबोध्यसे यः स्तुति गीति मंगलैः
आदभ्रदर्भामधिशय्य स स्थलीं
जहासि निद्रमशिवैः शिवारूतैः।

(घ) विहाय शांनि नृप। धाम तत्पुनः
प्रसीद संधेहि वधाय विद्विषाम्।
व्रजन्ति शत्रूनवधूय निःस्पृहाः
शमेन सिद्धिं मुनयो च भूभृतः।

4. अद्योलिखीतेषु केषाञ्चित् चतुर्ष्णां प्रश्नानाम् उत्तराणि देयानि– 4×2

(क) किरातार्जुनीयम् महाकाव्ये कति सर्गाः सन्ति?

(ख) अर्थगौरवस्य क्षेत्रे कस्य महाकवेः प्रसिद्धि?

(ग) वनेचरः कः आसीत्?

(घ) वरं विरोधाऽपि समं महात्मभिः सूक्ते कोऽर्थ?

(ङ) के पराभवं व्रजन्ति?

(च) चित्तवृत्तयः कीदृशी भवन्ति?

(छ) शमेन सिद्धि के प्राप्नुवन्ति?

(ज) वृकोदरः कस्य नाम आसीत्?

5. अद्योलिखीतेषु कयोः द्वयोः श्लोकयोः सप्रसंग व्याख्या कार्या– 6×2

(क) विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरूः।
विद्या बन्धजनो विदेशगमने विद्या परं दैवतं
विद्या राजसु पूजिता न तु धनं विद्याविहीन पशुः।

(ख) मौनान्मूकः प्रवचन पटुर्वातुलो जल्पको वा
धृष्टं, पार्श्वे वसति च तदा दूरतश्चा प्रगल्भः
क्षान्त्या भीरूर्पदि न सहते प्रायशो नाभिजातः।
सेवाधर्मः परमगहनो योगिनामप्यगम्यः।

(ग) भवन्ति नम्रास्तरवः फलोद्गमै–
नवाम्बुभिर्भूरि विलम्बितो घनाः।
अनुद्धताः सत्पुरूषाः समृद्धिभिः
स्वभाव एवैष परोपरकारिणाम्।

(घ) पत्रं नैव यदा करीरविटपे दोषो वसन्तस्य किं
नो लूको ऽप्यवलोकते यदि दिवा सूर्यस्य किं दूषणम्।
धारा नैव पतन्ति चातकमुखे मेघस्य किं दूषणं
यत्पूर्व विधिना ललाटलिखितं तन्मार्जितुं कः क्षमः।

6. अद्योलिखितेषु प्रश्नेषु केषाञ्चित् चतुर्ष्णां प्रश्नानाम् उत्तराणि देयानि – 4×2

(क) विद्यया अलङ्कृतः अपि कः परिहर्त्तव्यः?

(ख) कस्य शास्त्रविहितम् औषाधं नास्ति?

questionpaperesult.com

Scanned by CamScanner

(ग) केषां जरामरणजं भयं नास्ति?
(घ) सत्संगतिः पुसां किं किं करोति?
(ङ) विवकेभ्रष्टानां विनिपातः कथं भवति?
(च) सेवाधर्मः कीदृशः भवति?
(छ) सन्मित्र लक्षणं किम्?
(ज) न्यायात् पथः के न प्रविचलन्ति?

7. अद्योलिखितेषु विषयेषु कमप्ये कं विषयमधिकृत्य भाषायां निबन्धो लेखनीयः– 10
(क) आधुनिके युगे संस्कृतस्य महत्त्वम्
(ख) भारवेरर्थगौरवम्
(ग) गीता सुगीता कर्त्तव्या
(घ) विद्याधनं प्रधानम्

8. निम्नलिखिता गद्यांश पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां देयानि–

सतां सज्जनानां वा सङ्गतिः सत्संगतिः उच्यते। सज्जनाना सङ्गमेन मनुष्यः सज्जनो विनीतः सभ्यश्च भवति। दुर्जनानां सङ्गमेन नरः दृष्टः संजायते, दुर्जनस्य च अधः पतनं अश्वयमेव भवति। मानवः यादृशानां पुरुषाणां सङ्गति करोति स तादृश एव भवति। अतः केनचित् सम्येगेवोक्तम्–

संसर्गजा दुषुण भवन्ति।
हीयते हि मतिस्तात घनैः सह समागमात्।
समैश्च समतामेति विशिष्टैशन विशिष्टताम्।
सत्सङ्गत्या मानवः उन्नतिपदं प्राप्नोति।

सत्सङ्गति प्रभावेण मानवानां प्रतिष्ठा कीर्तिश्च वर्धते, तथा च पापं अपाकर्तुं शक्यते। अतः एवोच्यते–

जाड्यं धियो हरति सिञ्चति वाचि सत्यम्
मानोन्नति दिशति पापमपाकरोति
चेतः प्रसादयति दिक्षु तनोति कीर्तिम्
सत्संगतिः कथय किं न करोति पुसाम्।

अतः सत्संगति करणीया, न च कदापि दुर्जनसंगतिः करणीया।

(अ) उपर्युक्त गद्यांशस्य शीर्षकं देयम्। 2
(आ) अधोलिखीतानां प्रश्ननाम् उत्तराणि देयानि – 5×1
(1) सत्संगतिः का उच्यते?
(2) सज्जनानां सङ्गमेन मनुष्यः कीदृशः भवति?
(3) सत्सङ्गत्यां मानवः किं प्राप्नाति?
(4) सत्सङ्गति प्रभावेण किं वर्धते?
(5) सत्संगतिः पुंसां किं किं करोति?
(ब) उपर्युक्त गद्यांशस्य संस्कृतभाषायां संक्षिप्तीकरणं क्रियताम् 3

9. अधोलिखितेषु सूत्रेषु कयोश्चिद् द्वयोः सूत्रयोः सोदाहरणं व्याख्यां कार्या– $2\times2^{1/2}$
(1) कर्तरि शप् (2) एरुः
(3) लुङ् लङ् लृङ् क्ष्वडुदात्तः (4) दिवादिभ्यः श्यन्

uestionpaperesult.com

Scanned by CamScanner

10. अधोलिखितेषु पदेषु केषाञ्चित् पञ्चपदानां सूत्रोल्लेखपूर्वकं सिद्धिः कार्या— 5×3

(1) भवन्ति (2) अभवत्

(3) एधे (4) जुहोति

(5) दीव्यतम् (6) सुनोषि

(7) तोत्स्यति (8) रुणद्धि

(9) तनिष्यामि (10) चोरयेत्

uestionpaperesult.com

Scanned by CamScanner